# ॥ दशमोऽध्यायः ॥

ध्यानं
ॐ उत्तप्त हेम रुचिरां रविचन्द्र वह्नि-
नेत्रां धनुश्शरयु ताङ्कुश पाशशूलम् ।
रम्यैर्भुजैश्च दधतीं शिवशक्ति रूपां
कामेश्वरीं हृदि भजामि धृतेन्दुलेखाम् ॥

ॐ ऋषिरुवाच ॥ १॥

निशुम्भं निहतं दृष्ट्वा भ्रातरं प्राण सम्मितम् ।
हन्यमानं बलं चैव शुम्भः क्रुद्धोऽब्रवीद्वचः ॥ २॥

बलावले पाद्दुष्टे त्वं मा दुर्गे गर्वमावह ।
अन्यासां बल माश्रित्य युद्ध्यसे यातिमानिनी ॥ ३॥

देव्युवाच ॥ ४॥
एकैवाहं जगत्यत्र द्वितीया का ममापरा ।
पश्यैता दुष्ट मय्येव विशन्त्यो मद्विभूतयः ॥ ५॥

ततः समस्ता स्ता देव्यो ब्रह्माणी प्रमुखा लयम् ।
तस्या देव्यास्तनौ जग्मुर् एकैवासीत्तदाम्बिका ॥ ६॥

देव्युवाच ॥ ७॥
अहं विभूत्या बहुभिर् इह रूपै र्यदा स्थिता ।

तत्संहृतं मयैकैव तिष्ठाम्याजौ स्थिरो भव ॥ ८॥

ऋषिरुवाच ॥ ९॥
ततः प्रववृते युद्धं देव्याः शुम्भस्य चोभयोः ।
पश्यतां सर्वदेवानां असुराणां च दारुणम् ॥ १०॥

शरवर्षैः शितैः शस्त्रै स्तथास्त्रै श्चैव दारुणैः ।
तयोर्युद्ध मभूद्भूयः सर्वलोक भयङ्करम् ॥ ११॥

दिव्यान्यस्त्राणि शतशो मुमुचे यान्यथाम्बिका ।
बभञ्ज तानि दैत्येन्द्र स्तत्प्रतीघात कर्तृभिः ॥ १२॥

मुक्तानि तेन चास्त्राणि दिव्यानि परमेश्वरी ।
बभञ्ज लीलयैवोग्र हुङ्कारोच्चारणादिभिः ॥ १३॥

ततः शरशतै र्देवीं आच्छादयत सोऽसुरः ।
सापि तत्कुपिता देवी धनुश्चिच्छेद चेषुभिः ॥ १४॥

छिन्ने धनुषि दैत्येन्द्र स्तथा शक्ति मथाददे ।
चिच्छेद देवी चक्रेण तामप्यस्य करे स्थिताम् ॥ १५॥

ततः खड्ग मुपादाय शतचन्द्रं च भानुमत् ।
अभ्यधावत्तदा देवीं दैत्याना मधिपेश्वरः ॥ १६॥

तस्या पतत एवाशु खड्गं चिच्छेद चण्डिका ।
धनु र्मुक्तैः शितैर्बाणैश् चर्म चार्क करामलम् ॥ १७॥

हताश्वः स तदा दैत्यश् छिन्नधन्वा विसारथिः ।
जग्राह मुद्गरं घोरं अम्बिका निधनोद्यतः ॥ १८॥

चिच्छेदा पततस्तस्य मुद्गरं निशितैः शरैः ।
तथापि सोऽभ्य धावत्तां मुष्टि मुद्यम्य वेगवान् ॥ १९॥

स मुष्टिं पातयामास हृदये दैत्य पुङ्गवः ।
देव्यास्तं चापि सा देवी तलेनोरस्य ताडयत् ॥ २०॥

तल प्रहाराभि हतो निपपात महीतले ।
स दैत्यराजः सहसा पुनरेव तथोत्थितः ॥ २१॥

उत्पत्य च प्रगृह्योच्चैर् देवीं गगन मास्थितः ।
तत्रापि सा निराधारा युयुधे तेन चण्डिका ॥ २२॥

नियुद्धं खे तदा दैत्यश् चण्डिका च परस्परम् ।
चक्रतुः प्रथमं सिद्ध मुनि विस्मय कारकम् ॥ २३॥

ततो नियुद्धं सुचिरं कृत्वा तेनाम्बिका सह ।
उत्पात्य भ्रामयामास चिक्षेप धरणीतले ॥ २४॥

स क्षिप्तो धरणीं प्राप्य मुष्टि मुद्यम्य वेगितः ।
अभ्यधावत दुष्टात्मा चण्डिका निधनेच्छया ॥ २५॥

तमायान्तं ततो देवी सर्वदैत्य जनेश्वरम् ।

जगत्यां पातयामास भित्त्वा शूलेन वक्षसि ॥ २६॥

स गतासुः पपातोर्व्यां देवी शूलाग्र विक्षतः ।
चालयन् सकलां पृथ्वीं साब्धि द्वीपां सपर्वताम् ॥ २७॥

ततः प्रसन्न मखिलं हते तस्मिन् दुरात्मनि ।
जगत्स्वास्थ्य मतीवाप निर्मलं चाभवन्नभः ॥ २८॥

उत्पात मेघाः सोल्का ये प्रागासंस्ते शमं ययुः ।
सरितो मार्ग वाहिन्यस् तथासंस्तत्र पातिते ॥ २९॥

ततो देवगणाः सर्वे हर्ष निर्भर मानसाः ।
बभूवु र्निहते तस्मिन् गन्धर्वा ललितं जगुः ॥ ३०॥

अवादयं स्तथैवान्ये ननृतुश्चाप्सरोगणाः ।
ववुः पुण्यास्तथा वाताः सुप्रभोऽभू द्दिवाकरः ॥ ३१॥

जज्वलुश्चाग्नयः शान्ताः शान्ता दिग्जनितस्वनाः ॥ ३२॥

॥ इति श्रीमार्कण्डेय पुराणे सावर्णिके मन्वन्तरे
देवीमाहात्म्ये शुम्भवधो नाम दशमोऽध्यायः ॥ १०॥